# Vedanta Dindimah

# વેદાન્તડિણ્ડિમઃ

## Document Information

Text title : Vedanta Dindimah

File name : vedAntaDiNDimaH.itx

Category : major_works, vedanta

Location : doc_z_misc_major_works

Author : Nrisimhasarasvati of unknown timeframe or Shankaracharya

Latest update : August 5, 2025

Send corrections to : (sanskrit at cheerful dot c om)

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2025

*sanskritdocuments.org*

# વેદાન્તડિણ્ડિમઃ

વેદાન્તડિણ્ડિમાસ્તત્ત્વમેકમુદ્ઘોષયન્તિ યત્ ।
આસ્તામ્પુરસ્તાત્તત્તેજઃ દક્ષિણામૂર્તિ સંજ્ઞિતમ્ ॥ ૧॥

આત્માનાત્મપદાર્થૌ દ્વૌ ભોક્તૃભોગ્યત્વલક્ષણૌ ।
બ્રહ્મૈવાત્મા ન દેહાદિરિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨॥

જ્ઞાનનાજ્ઞાનનપદાર્થૌ દ્વાવાત્મનો બન્ધમુક્તિદૌ ।
જ્ઞાનાન્મુક્તિર્નિબન્ધોઽન્યદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩॥

જ્ઞાતૃજ્ઞેયપદાર્થૌ દ્વૌ ભાસ્યભાસકલક્ષણૌ ।
જ્ઞાનતા બ્રહ્મ જગજ્જ્ઞેયમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪॥

સુખદુઃખપદાર્થૌ દ્વૌ પ્રિયવિપ્રિયકારકૌ ।
સુખંબ્રહ્મ જગદ્દુઃખમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૫॥

સમષ્ટિવ્યષ્ટિરૂપૌ દ્વૌ પદાર્થૌ સર્વસંમતૌ ।
સમષ્ટિરીશ્વરો વ્યષ્ટિર્જીવો વેદાન્તડિણ્ડિમઃ ॥ ૬॥

જ્ઞાનકર્મપદાર્થૌ દ્વૌ વસ્તુકર્ત્રાત્મતન્ત્રકૌ ।
જ્ઞાનનાન્મોક્ષો ન કર્મભ્ય ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૭॥

શ્રોતવ્યાશ્રાવ્યરૂપૌ દ્વૌ પદાર્થૌ સુખદુઃખદૌ ।
શ્રોતવ્યંબ્રહ્મ નૈવાન્યદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૮॥

ચિન્ત્યાચિન્ત્યપદાર્થૌ દ્વૌ વિશ્રાન્તિશ્રાન્તિદાયકૌ ।
ચિન્ત્યંબ્રહ્મ પરંનાન્યદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૯॥

ધ્યેયાધ્યેયપદાર્થૌ દ્વૌ ધીસમાધ્યસમાધિદૌ ।
ધ્યાતવ્યંબ્રહ્મ નૈવાન્યદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૦॥

યોગિનો ભોગિનો વાપિ ત્યાગિનો રાગિણોઽપિ ચ ।
જ્ઞાનનાન્મોક્ષો ન સન્દેહ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૧॥

ન વર્ણાશ્રમસઙ્કેતૈર્ન કર્મોપાસનાદિભિઃ ।
બ્રહ્મજ્ઞાનંવિના મોક્ષ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૨॥

અસત્યઃ સર્વસંસારો રસાભાસાદિદૂષિતઃ ।
ઉપેક્ષ્યો બ્રહ્મ વિજ્ઞેયમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૩॥

વૃથાક્રિયા વૃથાલાપાન્વૃથાવાદાન્મનોરથાન્ ।
ત્યક્ત્વૈકંબ્રહ્મ વિજ્ઞેયમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૪॥

સ્થિતો બ્રહ્માત્મના જીવો બ્રહ્મ જીવાત્મના સ્થિતમ્ ।
ઇતિ સંપશ્યતાં મુક્તિરિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૫॥

જીવો બ્રહ્માત્મના જ્ઞેયો જ્ઞેયં જીવાત્મના પરમ્ ।
મુક્તિસ્તદૈક્યવિજ્ઞાનનાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૬॥

સર્વાત્મત્વાત્ પરં બ્રહ્મ શ્રોતુરાત્મતયા સ્થિતમ્ ।
નાયાસસ્તત્ત્વવિજ્ઞપ્ત્વાવિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૭॥

ઐહિકં ચામુષ્મિકં ચ તાપાન્તં કર્મસઞ્ચયમ્ ।
ત્યક્ત્વા બ્રહ્મૈવ વિજ્ઞેયમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૮॥

અદ્વૈતદ્વૈતવાદૌ દ્વૌ સૂક્ષ્મસ્થૂલદશાં ગતૌ ।
અદ્વૈતવાદાન્મોક્ષઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૧૯॥

કર્મિણો વિનિવર્તન્તે નિવર્તન્ત ઉપાસકાઃ ।
જ્ઞાનિનો ન નિવર્તન્ત ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૦॥

પરોક્ષાત્સફલં કર્મ જ્ઞાનં પ્રત્યક્ષસત્ફલમ્ ।
જ્ઞાનમેવાભ્યસેત્તસ્માદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૧॥

વૃથા શ્રમોઽયં વિદુષાં વૃથાયં કર્મિણાં શ્રમઃ ।
યદિ ન બ્રહ્મવિજ્ઞાનમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૨॥

અલં યાગૈરલં યોગૈરલં ભોગૈરલં ધનૈઃ ।
પરસ્મિન્ બ્રહ્મણિ જ્ઞાનત ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૩॥

અલં વેદૈરલં શાસ્ત્રૈરલં સ્મૃતિપુરાણકૈઃ ।
પરમાત્મનિ વિજ્ઞાનત ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૪॥

નર્ચા ન યજુષાર્થોઽસ્તિ ન સામ્નાર્થોઽસ્તિ કશ્ચન ।
જાતે બ્રહ્માત્મવિજ્ઞાનન ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૫॥

કર્માણિ ચિત્તશુદ્ધ્યર્થમૈકાગ્ર્યાર્થમુપાસના ।
મોક્ષાર્થં બ્રહ્મવિજ્ઞાનનમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૬॥

સઞ્ચિતાગામિકર્માણિ દહ્યન્તે જ્ઞાનનવહ્નિના ।
પ્રારબ્ધાન્યપ્યનુભવાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૭॥

ન પુણ્યકર્મણો વૃદ્ધિર્ન હાનિઃ પાપકર્મણઃ ।
નિત્યાસઙ્ગાત્મનિષ્ઠાનામિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૮॥

બુદ્ધિપૂર્વાબુદ્ધિપૂર્વકૃતાનાં પાપકર્મણામ્ ।
પ્રાયશ્ચિત્તમહો જ્ઞાનનમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૨૯॥

દૃગ્દૃશ્યૌ દ્વૌ પદાર્થૌ તૌ પરસ્પરવિલક્ષણૌ ।
દૃગ્બ્રહ્મ દૃશ્યં માયા સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૦॥

અવિદ્યોપાધિકો જીવો માયોપાધિક ઈશ્વરઃ ।
માયાવિદ્યાગુણાતીતં બ્રહ્મ વેદાન્તડિણ્ડિમઃ ॥ ૩૧॥

સાકારં ચ નિરાકારં સગુણં ચાગુણાત્મકમ્ ।
તત્ત્વં તદ્બ્રહ્મ પરમમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૨॥

દ્વિજત્વં વિધ્યનુષ્ઠાનાદ્વિપ્રત્વં વેદ પાઠતઃ ।
બ્રાહ્મણ્યં બ્રહ્મવિજ્ઞાનનાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૩॥

સર્વાત્મના સ્થિતં બ્રહ્મ સર્વં બ્રહ્માત્મના સ્થિતમ્ ।
ન કાર્યં કારણાદ્ભિન્નમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૪॥

સત્તાસ્ફુરણસૌખ્યાનિ ભાસન્તે સર્વવસ્તુષુ ।
તસ્માદ્બ્રહ્મમયં સર્વમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૫॥

અવસ્થાત્રિતયં યસ્ય ક્રીડાભૂમિતયા સ્થિતમ્ ।
તદેવ બ્રહ્મ જાનીયાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૬॥

યન્નાદૌ યચ્ચ નાસ્ત્યન્તે તન્મધ્યે ભાતમપ્યસત્ ।
અતો મિથ્યા જગત્સર્વમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૭॥

યદસ્ત્યાદૌ યદસ્ત્યન્તે યન્મધ્યે ભાતિ તત્સ્વયમ્ ।
બ્રહ્મૈવૈકમિદં સત્યમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૮॥

પુરુષાર્થત્રયાવિષ્ટાઃ પુરુષાઃ પશવો ધ્રુવમ્ ।

મોક્ષાર્થી પુરુષશ્રેષ્ઠ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૩૯॥
ઘટકુડ્યાદિકં સર્વં મૃત્તિકામાત્રમેવ ચ ।
તથા બ્રહ્મ જગત્સર્વમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૦॥

ષણ્નિહત્ય ત્રયં હિત્વા દ્વયં ભિત્ત્વાઽખિલાતિગમ્ ।
એકં બુદ્ધ્વાઽશ્નુતે મોક્ષમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૧॥

ભિત્વાષટ્ પઞ્ચભિત્વાઽથ ગત્વાગ્રે ચતુરસ્ત્રિકમ્ ।
દ્વયં હિત્વાશ્રયેદેકમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૨॥

દેહો નાહમહં દેહી દેહસાક્ષીતિ નિશ્ચયાત્ ।
જન્મમૃત્યુપ્રહીણોઽસાવિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૩॥

પ્રાણો નાહમહં દેવઃ પ્રાણસાક્ષીતિ નિશ્ચયાત્ ।
ક્ષુત્પિપાસોપશાન્તિઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૪॥

મનો નાહમહં દેવો મનઃસાક્ષીતિ નિશ્ચયાત્ ।
શોકમોહાપહાનિઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૫॥

બુદ્ધિર્નાહમહં દેવો બુદ્ધિસાક્ષીતિ નિશ્ચયાત્ ।
કર્તૃભાવનિવૃત્તિઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૬॥

નાજ્ઞાનનં સ્યામહં દેવોઽજ્ઞાનનસાક્ષીતિ નિશ્ચયાત્ ।
સર્વાનર્થનિવૃત્તિઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૭॥

અહં સાક્ષીતિ યો વિદ્યાદ્વિવિચ્યૈવં પુનઃ પુનઃ ।
સ એવ મુક્તોઽસૌ વિદ્વાનિતિ વેદાન્તડિણ્ડિમઃ ॥ ૪૮॥

નાહં માયા ન તત્કાર્યં તત્સાક્ષી પરમોઽસ્મ્યહમ્ ।
ઇતિ નિઃસં શયજ્ઞાનનાન્મુક્તિર્વેદાન્તડિણ્ડિમઃ ॥ ૪૯॥

નાહં સર્વમહં સર્વં મમ સર્વમિતિ સ્ફુટમ્ ।
જ્ઞાનતે તત્ત્વે કુતો દુઃખમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૦॥

દેહાદિપઞ્ચકોશસ્થા યા સત્તા પ્રતિભાસતે ।
સા સત્તાત્મા ન સન્દેહ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૧॥

દેહાદિપઞ્ચકોશસ્થા યા સ્ફૂર્તિરનુભૂયતે ।
સા સ્ફૂર્તિરાત્મા નૈવાન્યદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૨॥

દેહાદિપઞ્ચકોશસ્થા યા પ્રીતિરનુભૂયતે ।

સા પ્રીતિરાત્મા કૂટસ્થ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૩॥

વ્યોમાદિપઞ્ચભૂતસ્થા યા સત્તા ભાસતે નૃણામ્ ।
સા સત્તા પરમં બ્રહ્મ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૪॥

વ્યોમાદિપઞ્ચભૂતસ્થા યા ચિદેકાનુભૂયતે ।
સા ચિદેવ પરં બ્રહ્મ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૫॥

વ્યોમાદિપઞ્ચભૂતસ્થા યા પ્રીતિરનુભૂયતે ।
સા પ્રીતિરેવ બ્રહ્મ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૬॥

દેહાદિકોશગા સત્તા યા સા વ્યોમાદિભૂતગા ।
માનાભાવાન્ન તદ્ભેદ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૭॥

દેહાદિકોશગા સ્ફૂર્તિર્યા સા વ્યોમાદિભૂતગા ।
માનાભાવાન્ન તદ્ભેદ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૮॥

દેહાદિકોશગા પ્રીતિર્યા સા વ્યોમાદિભૂતગા ।
માનાભાવાન્ન તદ્ભેદ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૫૯॥

સચ્ચિદાનન્દરૂપત્વાદ્બ્રહ્મૈવાત્મા ન સં શયઃ ।
શ્રુતિપ્રમાનુસન્ધાનાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૦ ॥

ન નામરૂપે નિયતે સર્વત્ર વ્યભિચારતઃ ।
અનામરૂપઃ સર્વઃ સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૧॥

ન જીવબ્રહ્મણોર્ભેદઃ સત્તારૂપેણ વિદ્યતે ।
સત્તાભેદે ન માનં સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૨॥

ન જીવબ્રહ્મણોર્ભેદઃ સ્ફૂર્તિરૂપેણ વિદ્યતે ।
સ્ફૂર્તિભેદે ન માનં સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૩॥

ન જીવબ્રહ્મણોર્ભેદઃ પ્રિયરૂપેણ વિદ્યતે ।
પ્રિયભેદે ન માનં સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૪॥

ન જીવબ્રહ્મણોર્ભેદો નામ્ના રૂપેણ વિદ્યતે ।
નામ્નો રૂપસ્ય મિથ્યાત્વાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૫॥

ન જીવબ્રહ્મણોર્ભેદઃ પિણ્ડબ્રહ્માણ્ડભેદતઃ ।
વ્યષ્ટેઃ સમષ્ટેરેકત્વાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૬॥

બ્રહ્મ સત્યં  જગન્મિથ્યા જીવો બ્રહ્મૈવ નાપરઃ ।
જીવન્મુક્તસ્તુ તદ્વિદ્વાનિતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૭॥

અનામરૂપં સકલં સન્મયં ચિન્મયં પ્રિયમ્ ।
કુતો ભેદઃ કુતો બન્ધઃ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૬૮॥

ન સત્યઃ કથ્યતે લોકો નામાદેર્વ્યભિચારતઃ  ।
વટુઃ કુલટ ઇત્યાદેરિતિ વેદાન્તડિણ્ડિમઃ  ॥ ૬૯ ॥

નામરૂપાત્મકં વિશ્વમિન્દ્રજાલં વિદુર્બુધાઃ ।
અનામત્વાદરૂપત્વાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૦॥

અભેદદર્શનં મોક્ષઃ સં સારો ભેદદર્શનમ્ ।
સર્વવેદાન્તસિદ્ધાન્ત ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૧॥

ન મતાભિનિવેશેન ન ભાષાવેષમાત્રતઃ ।
મુક્તિર્વિનાત્મવિજ્ઞાનનમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૨॥

ન કામ્યપ્રતિષિદ્ધાભિઃ ક્રિયાભિર્મોક્ષવાસના ।
ઈશ્વરાનુગ્રહાત્ સા સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૩॥

અવિજ્ઞાનતે જન્મ નષ્ટં વિજ્ઞાનતે જન્મ સાર્થકમ્ ।
જ્ઞાનતુરાત્મા ન દૂરે સ્યાદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૪॥

દશમસ્ય પરિજ્ઞાનને નાયાસોઽસ્તિ યથા તથા ।
સ્વસ્ય બ્રહ્માત્મવિજ્ઞાનન ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૫॥

ઉપેક્ષ્યૌપાધિકાન્દોષાન્ગૃહ્યન્તે વિષયા યથા ।
ઉપેક્ષ્ય દૃશ્યં તદ્બ્રહ્મ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૬॥

સુખમલ્પં બહુક્લેશં વિષયગ્રાહિણાં નૃણામ્ ।
અનન્તં બ્રહ્મનિષ્ઠાનામિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૭॥

ધનૈર્વા ધનદૈઃ પુત્રૈર્દારાગારસહોદરૈઃ ।
ધ્રુવં પ્રાણહરૈર્દુઃખમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૮॥

સુપ્તેરુત્થાય સુપ્ત્યન્તં બ્રહ્મૈકં પ્રવિચિન્ત્યતામ્ ।
નાતિદૂરે નૃણાં મૃત્યુરિતિ વેદાન્તડિણ્ડિમઃ ॥ ૭૯॥

પઞ્ચાનામપિ કોશાનાં માયાનર્થાત્મતોચિતા  ।
તત્સાક્ષિબ્રહ્મવિજ્ઞાનનાદિતિ વેદાન્તડિણ્ડિમઃ  ॥ ૮૦ ॥

દશમસ્ય પરિજ્ઞાનનાન્નવજ્ઞસ્ય યથા સુખમ્ ।
તથા જીવસ્ય સત્પ્રાપ્તિરિતિ વેદાન્તડિણ્ડિમઃ ॥ ૮૧॥

નવભ્યોઽસ્તિ પરઃ પ્રત્યઙ્ નૈવ વેદ પરં પરમ્ ।
તદ્વિજ્ઞાનનાદ્ભવેત્તુલ્યા મુક્તિર્વેદાન્તડિણ્ડિમઃ ॥ ૮૨॥

નવાભાસાન્નવ જ્ઞાનત્વા નવોપાધીન્નવાત્મના ।
મિથ્યા જ્ઞાનત્વાવશિષ્ટે તુ મૌનં વેદાન્તડિણ્ડિમઃ ॥ ૮૩॥

પરમે બ્રહ્મણિ સ્વસ્મિન્ પ્રવિલાપ્યાખિલં જગત્ ।
ગાયન્નદ્વૈતમાત્માનમાસ્તે વેદાન્તડિણ્ડિમઃ ॥ ૮૪॥

પ્રતિલોમાનુલોમાભ્યાં વિશ્વારોપાપવાદયોઃ ।
ચિન્તને શિષ્યતે તત્ત્વમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૮૫॥

નામરૂપાભિમાનઃ સ્યાત્સં સારઃ સર્વદેહિનામ્ ।
સચ્ચિદાનન્દદૃષ્ટિઃ સ્યાન્મુક્તિર્વેદાન્તડિણ્ડિમઃ ॥ ૮૬॥

સચ્ચિદાનન્દસત્યત્વે મિથ્યાત્વે નામરૂપયોઃ ।
વિજ્ઞાનતે કિમિદં જ્ઞેયમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૮૭॥

સાલમ્બનં નિરાલમ્બં સર્વાલમ્બાવલમ્બિતમ્ ।
અવલમ્બેનાખિલાલમ્બ ઇતિ વેદાન્તડિણ્ડિમઃ ॥ ૮૮॥

ન કુર્યાન્ન વિજાનીયાત્ સર્વં બ્રહ્મેત્યનુસ્મરન્ ।
યથા સુખં તથા તિષ્ઠેદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૮૯॥

સ્વકર્મપાશવશગઃ પ્રાજ્ઞોઽન્યો વા જનો ધ્રુવમ્ ।
પ્રાજ્ઞઃ સુખં નયેત્કાલમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૯૦॥

ન વિદ્વાં સં તપેચ્ચિત્તં કરણેઽકરણે ધ્રુવમ્ ।
સર્વમાત્મેતિ વિજ્ઞાનદિતિ વેદાન્તડિણ્ડિમઃ ॥ ૯૧॥

નૈવાભાસં સ્પૃશેત્કર્મ મિથ્યોપાધિમપિ સ્વયમ્ ।
કુતોઽધિષ્ઠાનમત્યચ્છમિતિ વેદાન્તડિણ્ડિમઃ ॥ ૯૨॥

અહોઽસ્માકમલં મોહૈરાત્મ બ્રહ્મેતિ નિર્ભયમ્ ।
શ્રુતિભેરીરવોઽદ્યાપિ શ્રૂયતે શ્રુતિરઞ્જનઃ ॥ ૯૩॥

વેદાન્તભેરીઝઙ્કારઃ પ્રતિવાદિભયઙ્કરઃ ।

શ્રૂયતાં બ્રાહ્મણૈઃ શ્રીમદ્દક્ષિણામૂર્ત્યનુગ્રહાત્ ॥ ૯૪॥

ઇતિ વેદાન્તડિણ્ડિમઃ સમ્પૂર્ણઃ ।
ૐ તત્સત્ ।

The text is generally attributed to
Nrisimhasarasvati although details
on him and time frame are not known.
Some attribute this to Shankaracharya,
as a typical practice out of reverence and
commonality of Adwaita writings when an
authorship is not clear. This is,
however, considered doubtful to be his
based on the upadeshasAhasrI composition.

*Vedanta Dindimah*
pdf was typeset on August 5, 2025

Please send corrections to *sanskrit@cheerful.com*